कारुण्य भवभूतिरेव तनत

वसन्तभगिनी रमेशभ्राता जेठवा
अध्यापिका,
सरकारी विनयन कॉलेज, तलाजा

प्रस्तावना

भवभूतेर्जीवनवृत्तं नाट्य – कृतित्वं च – श्रीभवभूति: कान्यकुब्जेश्वरस्य श्रीमतो यशोवर्मण आश्रितो महाकविरित्यत्र सर्वेषां सुधियाम् ऐकमत्यम् । महाकविना बाणेन हर्षचरिते महाकविगणनाप्रसंडगे नास्याभिधानम् अभ्यधार्यीतिमहाकवेर्बाणात् पूर्वं जनिकालमस्य नेति निर्णीयते । एवं भवभूतेर्जनिकाल: ७०० ईसवीयस्य सन्निधौ स्वीक्रियते । विदर्भ प्रदेशस्थ – पद्मपुरनगर – वास्तव्योऽयं श्रीकण्ठपदलाञ्छनो भवभूति नामाऽभवत् । पितामहोऽस्य भट्टगोपालो, जनको नीलकण्ठो, जननी जातुकर्णी, गुरुश्चज्ञाननिधिर्नाम । नाटकत्रयस्य समुपलभ्यते मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितं च । वाग्देवी तं वश्येव समन्ववर्ततेति तथ्यं स्वयमेवोद्घोष्यते तेन । यं ब्रह्माणिमियं देवी वाग्वश्येवानुवर्तते (उत्तर – १.२) ।

(१) भवभूते: करुणो रस

करुणरसनिष्यन्दे नातिशेतेऽन्यो महाकविर्महाकविममुम् । करुणरसोद्रकम् आलोक्यैव कवेरेतस्य कृतिषु कृतिभि: कृतानि कतिपयानि प्रशंसापद्यानि । आर्यासप्तशत्यां श्री गोवर्धनाचार्यो भवभूतेर्भारतीं मूधरसुतया गौर्योपमिमीते । एतत्कृतकारुण्ये ग्रावाणोऽपि रुदन्तिं, अन्येषां तु का कथा –

भवभूते: सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥

(आर्या – १.३६)

कारुण्ये स कालिदासादप्यतिरिच्यते । अत उच्चते – "उत्तरे रामचरिते भवमूतिर्विशिष्यते ।"

(२) एको रस: करुण एव

करुणरसप्रवाहपरीक्षया परीक्ष्यते चेन्नाटकत्रयमस्य तर्हि उत्तररामचरितमेव सर्वातिशायि । यथाऽत्र करुणरस–निष्यन्दो, न तथाऽन्यत्र । किं कारुण्यम् ? करुणरस्य प्रवाह एवं कारुण्यमिति । इदमत्रावधेयम् । भवभूति: करुणरसं रसत्वेनैव नातिष्ठतेऽपितु समेषां रसानां मूलभूतत्वेन करुणमेवैकं रसं मनुते । अन्ये रसा अस्यैव वितर्तरुपेण परिणामरुपेण वा परिणमन्ते इति करुणरसस्य महत्वम् आतिष्ठते । आह च –

"एको रस: करुण एव निमित्तभेदाद्
भिन्न: पृथक् पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत् समग्रम् ।।"

(उत्तर. रु. ४७)

(३) कारुण्यं भवभूतिरेव तनुते

संस्कृतवाङ्मये करुणरसवर्णने भवभूतेस्तद्वेव स्थानं यत् शृङ्गारसवर्णने कालिदासस्य । नाटककृद्रुपेण द्वयोरेव प्रतिस्पर्धित्वम् । भवभूतौ बहिर्दृष्ट्यैव साकं सूक्ष्माऽन्तर्दृष्टारपि लक्ष्यते । मानवीयमनोभावानाम् अन्त: स्थितेश्च यादृक् सुसूक्ष्मं मनोवैज्ञानिकं विश्लेषणं भवभूतिना प्रस्तूयते, तदन्यत्र सुदुर्लभम् । जगते विनश्वरतां प्रेक्षं – प्रेक्षं भवभूते: कारुण्यप्लुता रसधारा प्रसरति । स रामकथाम्, प्राधान्येन सीता–परित्यागम्, आश्रित्य स्वीयां भावनां मूर्तरुपेणोपस्थापयति । तस्य वाचि तादृग् वीर्यं यथा न केवलं वृक्ष–वनस्पत्याद्य:, अपि तु पर्वत – रोदन – क्षमताऽपि तस्य वाचि दरीदृश्यते । नीरसोऽपि जन उत्तररामचरितम् अधीत्य नूनं बाष्पाकुलेक्षणो भवितेति निश्चप्रचम् ।

भवभूतौ भावनां कोमलता, हृदयस्पर्शिता, तादात्म्यानुभूति:, संवेदनशीलत्वं च वरीवर्ति, अतएव - "कारुण्यं भवभूतिरेव तुनुते" इति तस्य यशो जेगीयते । दिङ्मात्रमिह केचन मार्मिका भावोद्बोधका: प्रसङ्गा: प्रस्तूयन्ते ।

छद्मप्रयोगेण रावण: सीताम् अहरत् । तद्वियोगविषण्णस्य दाशरथे: स्थितिम् अवधार्य ग्रावाणोऽपि सहजां धीरतां मुञ्चन्ति, वज्रस्यापि मानसं मार्दवं संश्रयते –

"अथेदं रक्षोभि: कनकहरिणच्छद्मविधिना
तथा वृतं पापैर्व्यथयति यथा क्षालितमयि ।
जनस्थाने शून्ये विकलकरणैरार्य चरित्रै –
रपि ग्रावा रोदित्यपि दलति वज्रस्य उहृयम् ॥"

(उत्तर. १.२८)

सीता – परित्याग – सन्तप्तस्य रामस्य तादृश्येव ! वस्थाऽवर्तत । यथा पुटपाके कस्यचिद् धातो:

"अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथ: ।
पुटपाकप्रतीकाशो रामस्य करुणो रस: ॥"

(उत्तर ३.१)

लोकापवादेन जानकीं परित्यज्य राम: कथमपि न धृतिं विन्दते । न पौरान् उपालम्भयन्नाह–

"न किल भवतां देव्या: स्थानं गृहेऽभिमतं तत–
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।
चिरपरिचितास्ते भावास्तथा द्रवयन्ति
मामिदमशरणैरद्यास्माभि: प्रसीदत्तरुधते ॥"

(उत्तर . ३.३२)

न केवलमेतदेव । रामपरित्यक्ता सीता क्वचिद् अरण्ये श्वापैदर्भक्षितेति अनुमीयते रामेण । काष्टापन्नाया: सीताया वर्णनं कथमिव मनो द्रावयति –

"त्रस्तैकहायनकुरङ्गविलोलदृष्टे –
स्तस्या: परिस्फुरितगर्भभरालसाया: ।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥"

(उत्तर. ३.२८)

परित्यक्तायाः शोकसन्तप्तायाः सीतायाः शरीरलावण्यं विलीनम् ।
सा करुणस्य मूर्तिरिव, शरीरधारिणी विरहव्यथेव हीना दीना क्षीणा चालक्ष्यते –

करुणस्य मूर्तिरथवा शरीरिणी,
विरहव्यथेव वनमेति जानकी ॥

(उत्तर . ३.४)

शोकसन्तप्तचेता मर्मव्यथाहतचेतनो रामो जीवनं निष्फलं कष्टप्रायं दुःख–दावानिग्दग्धं च गणयति । प्राणा वज्रकीलवत् तस्य हृदयं रुन्धन्धित –

दुःखसंवेदनायैव रामे चैतन्यमाहितम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं दधि ॥

(उत्तर. १.४७)

शोको विलापोऽश्रुपातश्च जीवनरक्षासाधनानि, यथा जलाप्लावितटाकस्य सलिलानिः सारणेनैव सुरक्षा ।

पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ॥

(उत्तर . ३.२९)

सीताहरणचित्रदर्शनेन विषण्णस्य विलपतश्च दाशरथेरवस्थां वर्णयति कविः, बाष्पप्रसरं च मुक्ताहारेणोपमिमीते –

अयं तावद् बाष्पस्त्रुटित इव मुक्तमणिसरो
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुट तया
परेषामुन्नेयो भवति चिरमाध्मातहृदयः ॥

(उत्तर. १.२९)

शम्बूकप्रसङ्गेन दण्डकारण्यं पञ्चवटीं च प्राप्य जानकीसहवासं स्मारं – स्मांर खिद्यतेलतमां मनो मानिनो रामस्य रामोऽभिधते –

चिराद् वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित् संवेगात् प्रचल इव शल्यस्य शकलः ।
व्रणो रुढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः

पुराभूत: शोको विकलयति मां नूतन इव ।

(उत्तर. २.२६)

पञ्चवटीदर्शनेन रामस्य दु:खाग्निरुद्दामं प्रज्वलति, मोहश्च तं सर्वथाऽऽवृणोति –

अन्तर्लीनस्य दु:खाग्नेरद्योद्दामं ज्वलिष्यत: ।
उत्पीड इव धूमस्य मोह: प्रागावृणोति माम् ।।

(उत्तर. ३.९)

रामस्य सन्तापजां स्थितिं कथमिव कवि: सजीवरुपेण चित्रयति । तस्य हृदयं शोकाद् विदीयते, परं न द्विधा छिद्यते, मोहागमेऽपि चैतन्यं नोज्झति शोको देहं दहति, न च भस्मसात् कुरुते; विधिर्मर्मच्छेदनं विद्यते, न तु जीवितं समापयति –

दलति उदयं शोकोद्वेगाद् द्विधा तु न भिद्यते
वहति विकल: कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाह: करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ।।

(उत्तर. ३.३१)

रामो जानकीं सम्बोधयन् स्वीयाम् असह्यवेदनां विशदयति । समग्रं जगद् अन्धतामिस्रं प्रतीयते, महोश्च निश्चैतन्यं प्रथयति । किं वा शरणम् का वा गति: ?

हा हा देवी ! स्फुटति हृदयं ध्वंसते देहबन्ध:
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोह: स्थगयति कथं मन्दभाग्य: करोमि ।।

(उत्तर. ३.३८)

(४) उत्तरे रामचरिते भवभूतिर्विशिष्यते –

महाकविरुपेण कालिदासो –ऽतिशेते कवीनन्यान्, परं नाटककृद्रुपेण भवभूतिस्तय प्रतिस्पर्धी । उत्तररामचरिते तु स करुणरसप्रवाहे कालिदासादपि अतिरिच्यते । अतएव 'उत्तरे रामचरिते.' इति सूक्तिमुक्ता प्रसरीसर्ति । उत्तररामचरिते भवभूतेर्नाट्यकलाया: कवित्वस्य च चरमोत्कर्षो लक्ष्यते ।

द्वयोरेव कविवरयो: किंचिद् साम्यं वैषम्यं चावलोक्यते । साम्यदृशा परीक्षिते सति – द्वावेव सफलौ महाकवी नाटककारौ च:, द्वयोरेव भाषा वशवर्तिनी, स्वाभीष्टवर्णने द्वयो: प्रागल्भ्यम्; द्वयोरेव मौलिकत्वं प्रतिभाविष्टत्वं च; सहृदयहृदयहारिणी

विदग्धता ।

वैषम्यदृशा परीक्षिते सति (१) कालिदासकृतिषु प्रसादो माधुर्यं च, समासाभावो दुराहपदावलीपरित्यागश्च, परं भवभूति कृतिषु ओजोगुणस्य भूयस्त्वं दुरुहपदप्रयोग: समस्ता किलष्टा च पदावली प्रतिपदं परिलक्ष्यते । (२) कालिदासो: शृङ्गाररसवर्णने चरमोत्कर्ष धते, परं भवभूति: करुणरसप्रवाहे । (३) कालिदासो व्यञ्जनावृत्तिप्रधान:, भवभूतिस्तु अभिधावृत्तिप्रधान: । (४) कालिदासकृतिषु कल्पनारम्यत्वम्, भवभूतिकृतिषु भावगाम्भीर्यम्, कालिदासे सरसत्वं सरलत्वं च, भवभूतौ औजस्त्वं पौढिश्च कालिदासे नैसर्गिकत्वं भवभूतौ आदर्शरुपत्वं च प्रथते । (५) कालिदास: प्रकृतिवर्णने कोमलं ललितं च पक्षमाश्रयते । भवभूतिश्च प्रचण्डं कठोरं च पक्ष विशदयति । यथा उत्तररामचरिते भयावहवनानाम् ग्रीष्मर्तौ मध्याह्नस्य च वर्णनम् । यथा दण्डकवनवर्णनम् –

निष्कूजस्तिमिता: क्वचित् क्वचिदपि प्रोच्चण्डसत्त्वस्वना:,
स्वेचछासुप्तगभीर भोगभुजगश्वासप्रदीप्ताग्नहय: ॥
(उत्तर. २.१६)

उपसंहार :

करुणरसस्य प्रवाह: एव कारुण्यम् । करुणरसप्रवाह: यथा भवभूतिकृतिषु समुपलभ्यते नैतादृशमन्यत्र । उत्तररामचरिते तु करुणरस: सर्वेषां रसानां प्रमुखत्वेन स्वीकृत: । अन्ये शृङ्गार – अद्भुत – वीर – रौद्रादय: रसा: तु करुणस्यैव विवर्तरुपेण परिणमन्ते । सीतापरित्याग जन्य शोक: एवं स्थायीभाव: । अत्र सर्वत्र करुणरसस्यैव परिपाक: दृश्यते ।

करुणरसस्य स्थायीभाव: शोक: अस्ति । नाटयशास्त्रानुसार विभावानुभाव व्यभिचारीसंयोगाद् रस निष्पति: । एवं रस्यते आस्वाद्यते इति रस: इति रसस्य व्याख्या मिलीतवान् । रामस्य सन्तापजां स्थितिं कथमिव कवि: सजीवरुपेण चित्रयति । तस्य सन्ताप: – हा हा देवी ! स्फूटति हृदयं ध्वंसते देहबन्ध:...... श्लोकेन प्राप्नोतु । तत: कथितवान् यत: कारुण्यं भवभूतिरेव तनूते ।

सन्दर्भ ग्रन्थानि :

भवभूतिविरचित उत्तररामचरितम् ।
श्रीगोवर्धनाचार्य विरचित आर्यासप्तशतम् ।
वाल्मीकि रामायण:
भरतमुनिविरचित नाट्यशास्त्रम् ।